Shri Raghunath Temple MSS. Library,
JAMMU

No. ९३२८

Title स्मृति संस्कार रहस्यम्

Author रामचन्द्रः

Extent २५ Age १७८६

Subject न्याय शास्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृतिसंस्काररहस्यम्

१३२८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्मृतिमरहस्य ६००

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशायनमः ज्ञानानीनांसविषयकत्वेप्रत्यक्षसिद्धमेवभावनाख्यसंस्कारस्यतथात्वंतुनतथातस्यातींद्रियत्वात्किंतुका
लांतरभाविस्मृतिंप्रतिज्ञानस्यहेतुतापाद्यापारंविनाऽनिर्वाहाज्ज्ञानव्यापारतयातादृशसंस्कारस्यतत्सविषयकत्वमेतेरेणा
स्मृतिविषयतानियमानिर्वाहात्तत्तथात्वंकल्प्यते तथाहिसंस्कारस्यनिर्विषयकत्वेपटादिस्मारकसंस्काराद्घटादि
स्मरणावारणापत्तेस्तत्कारकतद्विशेष्यकस्मृतिंप्रतितत्कारकतद्विशेष्यकज्ञानजन्यसंस्कारस्यहेतुतावाच्यातस्यसविष
यकत्वेवलघीयसातत्कारकतद्विशेष्यकसंस्कारत्वेनैतिलाघवज्ञानसहकृतेनजनकतायांस्वावच्छिन्नतत्राहकानुमा
नेनतादृशधर्मावच्छिन्नत्वसिद्धौसंस्कारःसविषयकोविषयिताविच्छिन्नकारणतावत्त्वादित्यनुमानात्संस्कारस्यविषयतासिध्यति
अथसामान्यतःस्मृतित्वावच्छिन्नंप्रतिसंस्कारत्वेनैवहेतुतानतुतत्रविशेषोऽपितर्भावनीयःतत्कारकतद्विशेष्यकस्मृति.

राम.

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तावच्छिन्नप्रतिताहशज्ञानत्वेनैव हेतुता कल्प्यते तावतैव स्मृतिविषयतानियमउपपद्यते यत्तु स्मरणमुत्पादाव्यवहितपूर्वहा
रोणज्ञानकत्वानासत्यादव्यवहितपूर्वक्षणावच्छिन्नायाः संस्कारत्वादिरूपसाक्षात्कारणतावच्छेदकावच्छिन्नत्वोभात्मकसामग्री
प्रवृत्तिविषयकस्मृतित्वावच्छिन्नोत्पत्तिप्रयोजकत्वपाल्लीकरणीयत्वात् घटादिस्मारकसंस्कारदशायामपि घटादिस्मृत्युत्पादप्र
योजकसामग्रीसत्वादतिप्रसंगो दुर्वारः पूर्वेतिरसत्त्वव्यवहितप्राक्क्षणेकालिकसंबंधेन नानासत्त्वेपि व्यापारसंबंधेन तत्स
त्वात्सत्या॰ पारकत्वकारणस्य च व्यापारसंबंधेनाव्यवहितप्राक्क्षणापूर्वकार्योत्पत्तिप्रयोजकत्वात्तस्मात्तविषयकज्ञानस्या
पि स्मृत्युत्पत्तिप्रयोजकसामग्रीघटकत्वोपपत्तेः नच देशे कार्योत्पत्तौ व्यवहितपूर्वक्षणावच्छेदेन देशनिष्ठसामग्र्यप्रयो
जिकात्वं च विरविनष्टज्ञानस्यात्मर्भावेन संभवतितस्याव्यवहितप्राक्क्षणावच्छेदेनाहेतुत्वेः कालिकसंबंधेन तत्साधिकरणका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२

त्वस्यैवस्वीपरत्नावच्छेदकत्वात्व्यापारसंबंधेनतादृशकरणस्यज्ञानाधिकरणत्वेपिदेशेष्टत्वावच्छेदकत्वासंभवात्अन्यथैकाव
च्छेदेनएकत्रप्रतिषेधेदृष्टौविरोधात्ज्ञाननाशकालावच्छेदेनज्ञानात्यंताभावस्यतदधिकरणेऽवर्त्तमानताप्रसंगात् विपरीतज्ञाना
दिनाशेपिविशिष्टबुद्ध्याद्यनुदयप्रसंगः अथवहितपूर्वकरणवृत्तिसामग्र्यादेशसत्वस्यदेशेकार्योत्पत्तिनियामकतोपगमोच
विपरीतज्ञानाद्युत्तरकरणेपिविशिष्टस्मृत्यापत्तेः तद्देशेपिदेशस्यवान्यकालावच्छेदेनतदभाववत्वात् तद्देशावच्छेदेनतदव्यवं
हितपूर्वकरणनियतायाःसामग्र्याअन्यदेशनिष्ठकार्योत्पत्तिप्रयोजकत्वेपियगमेपिचिरविनष्टस्यज्ञानस्यस्मृत्युत्पादप्रयो
जकसामग्र्यंतर्भावोनसम्भवतिव्यापारसंबंधेनतस्यकालेदृष्टौदेशस्यात्वावच्छेदकत्वात्कालिकसंबंधेनकालेदृष्टोएवदेश
स्तथात्वात्तद्देशवृत्तिसामग्र्याअव्यवहितपूर्वकरणसत्वस्यदेशेकार्योत्पादप्रयोजकत्वेपगमेचपूर्वोक्तप्रतिप्रसंगइतिवाच्यं

राम-
२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्यापारसंबंधेनसव्यापारकारणत्वद्व्यवहितप्राक्कृत्वावच्छिन्नसाक्षात्कारणत्वोभयदेशसत्त्वाप्राप्त्यवहितप्राक्कृत्वावच्छिन्नप
देशकारणव्यापारसंपत्तिसहितस्वदेशत्वाविच्छेदेनकारणसमुदायसत्त्वस्यवातत्रकार्योत्पादकत्वोपगमेनानुपपत्तिभावात्व्या॰प
रत्वंचतज्जन्यत्वेसतिसाक्षात्त्वप्रकारकार्य्यजनकत्वेतत्रजन्यत्वंफलोपधायकरूपेणविवक्षितंतेनपटादिज्ञानजन्यसंस्कारेत्र
तिघटादिज्ञानस्यज्ञानत्वेनस्वरूपयोग्यत्वेपिनतस्यतद्व्यापारत्वेतिनतादृशसंस्कारघटितसामग्रीबलादघटादिगोचर
स्मरणापत्तिः जनकतायाव्यापारत्वसम्भवे
नउपेक्षात्मकघटज्ञानानुव्यवसायपटादिज्ञानजन्यसंस्कारबलादघटस्मरणापत्तेर्नावकाशः एवंजनकत्वमसाधारणवि
वक्षणीयंतेनतादृशघटज्ञानध्वंसस्यकारणोपाधिविधयाघटस्मृतिजनकत्वेपिनतद्बलादघटस्मरणापत्तिः असाधार

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३

णत्वं च जन्मस्यावच्छिन्नानिरूपितत्वं करणजन्यतावच्छेदकावच्छिन्नत्वं वेति वेन पर्वसति ध्वंसस्यैव तानथापारतात्पर्यम्भवेन भावनाख्य
संस्कारस्य वक्ष्यमाणपदवीसतिवर्त्तते परिच भावनानुपगमेऽपेक्षाज्ञानादपि स्मरणापत्तिः ध्वंसरूपव्यापारस्य तत्त्वाप्रकृतत्वात्तदुपग
मे च तत्र संस्कारकल्पनात्रापत्तिः न च ध्वंसहानोपसान्यज्ञानस्यैव स्मृतिजनकतास्तु किं संस्कारेणाभवन्मतेऽपि उपेक्षात्मकज्ञाने
न संस्कारजननवारणाय संस्कारध्वंसस्य उपेक्षान्यज्ञानत्वेन हेतुतायाश्चावश्यकतया तेन रूपेण स्मृतिजनकत्वेऽवच्छेदकगौरवस्य
उपेक्षान्यज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहस्य किं चित्करत्वात् इति वाच्यं उपेक्षान्यज्ञानत्वेन स्मृतिहेतुत्वेऽपेक्षा
त्मकज्ञानेतज्ज्ञानव्यक्तिभेदकूटस्यैकत्र निवेशनीयतया च्छेदकतायाश्च व्यापकज्ञातित्वेतावतोभेदानां विशेष्यविशेषणभा
वे विनिगमनाविरहेण गौरवात् उपेक्षान्यतस्यानुगतस्य दुर्निर्वचत्वात् एकभेदनिवेशासंभवात् चाक्षुषत्वादिना संकरप्रसंगतो कस्य

एम.
३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नच जातिस्मरसम्भवात्संस्कारशक्तिर्नेन रूपेण हेतुत्वेचतावतो भेदानामेकत्रनिवेशः किंतु एकैकभेदमंतर्भाव्य ज्ञानस्य पृथग्रूपेण
हेतुताकल्प्यतेऽपेक्षाज्ञानकालेतादृशव्यक्तेतरभिन्नज्ञानरूपकारणसत्त्वेपि तद्व्यक्तिभिन्नज्ञानरूपकारणविरहेणसंस्कारापत्त्य
संभवात्इतिनविनिगमनाविरहः पुष्कलगौरवावकाशः स्मृतेः प्रतिबन्धज्ञानस्य प्रत्येकभेदात्त्रिवेष्टनानाकारणत्वकल्पनेनसम्भवति उ
पेक्षात्मकभानाज्ञानं चेत्सदृशांशव्यापारसंवेधेनसकलकारणतावच्छेदकावच्छिन्नसत्तात्मकारणापत्तेर्दुर्वारत्वाच्चावश्यसंस्कारशक्ति
तादृशनानाकारणत्वकल्पनेप्युपेक्षात्मकज्ञानद्वयसमवधानस्यैकदासम्भवतदानींचतादृशासकलकारणतावच्छेदकाव
च्छिन्नसत्तासंस्कारापत्तिर्दुर्वारैवेतिवाच्यंतदनुरोधेनपादृशयादृशोपेक्षाव्यक्तीरेकदासमवधानंतादृशतादृशव्यक्तीनां भेदेद्व
यस्यैकत्रनिवेशात्भवन्मतेतथाविधसहस्रादिव्यक्तिव्यापाराणां एकदासत्त्वसम्भवेनसहस्रादिभेदानामेकत्रनिवेशनीय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तयागौरवात् अथवा ज्ञानस्य संस्कारप्रतिकार्य्यसहभावे नैव हेतुता उपेक्षात्मकज्ञानद्वयानंतरं कृतौ च पूर्वज्ञानविनाशात् तत्र तद्वा
संस्कारापत्तिसम्भवः अथवा संस्कारं प्रत्युपेक्षाव्यक्तीनां तत्र शक्तित्वेन प्रतिबंधकत्वमेव पक्षे उपेक्षानंतरं अपेक्षाज्ञानं तत्र पूर्व
ज्ञाननाशानंतरमेव संस्कारोत्पत्तेः तत्र शक्तेः प्रतिबंधकतैव वाच्यकल्प्यते द्वितीयेनैव पक्षे नापि संस्कारजननेकृतिविरहात् तस्य
तिप्रतिबंधनोपेक्षाव्यक्तीनां प्रतिबंधकतासंभवः तासां विनाशे स्मरणापत्तेर्वज्ञलेपवत् तत्र नापि तद्ध्वंसानां कदाचिदुत्पत्तेरुपेक्षाक
स्यांशस्योपेक्षाज्ञानानंतरमपि स्मरणानुपपत्तेः अतस्तत्रोपेक्षाभेदानां कारणतावच्छेदकत्वमेव स्वीकरणीयं इति उक्तगौरवं
दुर्वारमेव इति संस्कारसिद्धिरिति मन्यते तदापटादौ शेषः उपेक्षात्मकघटादौ उपेक्षाजन्यसंस्कारात् घटादिस्मृत्यापत्तिरतः संस्कारास्वस
मानविषयकत्वेन हेतुत्वमप्यावश्यकं अन्यथा तादृशतादृशतान व्यक्तीनां भेदकूटस्य एकत्वस्मृतिजनकतावच्छेदककोटौ भवे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शनीयत्वापत्त्याऽऽक्तगौरवापातात्समन्यमेतन्नदुपेक्षाभेदानांशिमित्तत्वेयेवघटादिविषयकसंस्कारकारणतायामवच्छेदकतयातत्त्व
दुपेक्षाप्यक्तीनांघटादिविषयकसंस्कारप्रतिबंधकतयावातत्रघटादिविषयकसंस्कारस्वरूपकारणापिरहेणतद्विषयकसंस्कारस्मर
णद्वारासंभवात्तावतोभेदानोपकत्वानिवेशात्पटादीपस्मारणानुरोधेनतत्रसंस्कारस्यावश्यकतयाभवन्मतेसंस्कारहेतुताणेत
तदंशिकोपेक्षाभेदनिवेशाश्रयतादृशसंस्कारंप्रतिप्रतिबंधकत्वकल्पनस्यत्वासंभवात्तत्रयमयाप्यांशिकोपेक्षाभेदाःस्थितिजनकता
वच्छेदकोटौननिवेश्यंतेकिंतुतज्जन्यसंस्कारस्यक्तीनांघटादिविषयकस्मृतित्वापत्तिप्रतिप्रतिबंधकत्वंकल्प्यतेतादृशज्ञा
नांतरापेक्षाभावकघटादिज्ञानातघटादिस्मरणोपपत्तेयेतादृशापेक्षात्मकज्ञानजन्यसंस्कारस्यक्तीनांतत्रोत्पत्तिजनकत्वमुपगम्य
तइतिचेदेवमपिसंस्कारंप्रतितत्तज्ज्ञानस्यक्तीनांप्रतिबंधकताकल्पनापेक्षयालाघवमेवनप्रतिबंधकतावच्छेदकेऽधिकस्यनिवेशा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तनच्च संस्कारं प्रति तत्तज्ज्ञानव्यक्तीनां प्रतिबंधकत्वे संस्कारत्वे भावनात्वे वा प्रतिबध्यतावच्छेदकमुपेयते इत्यत्र विनिगमकाभावात्
द्विविधप्रतिबंधकताकल्पने गौरवमिति वाच्यं भवन्मते पि तत्तत्संस्काराभावयोर्विशेष्यविशेषणाभावे विनिगमनाविरहेण सामा
न्ये वस्तुतस्तुल्यापकसंस्कारत्वजातेरप्रामाणिकतयाऽस्मन्मते नोक्तविनिगमनाविरहस्य प्रसक्तिरपि अथ संस्कारसत्त्वेन
स्मृतिधारावारणाय बुद्धिबंधकस्यापेक्षणीयतया तस्य च फलबलकल्प्यतेन तत्र प्रयोजनाभावेनो बुद्धिबंधकस्याकल्पना
हेवोपि क्षातः स्मरणवारणसंभवे आशिकोपि क्षाभेदाः स्मृतिजनकतावच्छेदककोटौ न विवेश्यते न वा तज्जन्यसंस्कारस्य व्यक्ती
नामपेक्षात्मकज्ञानजन्यसंस्कारव्यक्तीरुत्पेजकीकृत्य प्रतिबंधकताः कल्प्यते नापि संस्कारस्य समानविषयकत्वेन हेतुत्वस
वीशोपेक्षा ज्ञानाद्यप्येवं क्रमेण स्मरणवारणसम्भवे पि तादृशज्ञानजन्यानेतपणुसंस्कारव्यक्तीनामप्रामाणिकानां कल्पनेगौ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रवमयेनताहशोपेक्षान्यत्वसंस्कारकारणभावच्छेदककोटौनिवेश्यते तत्र द्वाभ्यां संस्कारं प्रति प्रतिबंधकत्वाक ल्प्यते इति चेद्रेवं स
तिज्ञानस्य हेतुताकल्पने तद्व्यापारत्वपासंस्कारकल्पने च निरर्थकं उद्बोधकसहकृतात्ममनोयोगादिरूपज्ञानसामान्यसामग्री त
स्वस्कारणसंभवात्तवस्मृतस्तु संबंधिपदादिज्ञानरूपोद्बोधकानामनुगतरूपेणास्थितिहेतुत्वपातत्तत्वेऽननुभूतपदार्थस्मरणा
पारणापस्त्वं प्रतिज्ञानत्वेन हेतुतापास्त द्व्यापारत्वपासंस्कारस्यचकल्पनापाद्यावश्यकत्वात् आशिकोपेक्षानोत्तरंतादृ
शनियतोद्बोधकसत्वेतद्विषयकस्मरणवारणायसमानविषयकत्वेनसंस्कारहेतुताकल्पनमावश्यकमेवत्र घटपदज्ञानादेर्य
घटत्वगतत्वपदज्ञानत्वादिनाहेतुतातद्ग्रहीतत्वादिरूपसंबंधस्यापिपुंसः पदज्ञानादितः तत्रदर्थस्मरणप्रसंगः परि
चगृहीतत्वत्रिकपदज्ञानत्वादिनातद्व्यावृत्तेतद्विस्मृतगृहीतत्वत्रिकपदज्ञानादितोपिस्मरणप्रसंगः नचसंबंधगोचरसंस्का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

एविशिष्टतत्तत्संवेदिज्ञानत्वेनहेतुत्वात्रायंदोषइतिवाच्यंएवमपितादृशसंस्कारस्यानुद्बुद्धतादृशायांसंवेदिज्ञानात्स्मरणापत्तेः
उद्बुद्धसंस्कारनिवेशेतुतादृशोद्बोधकानामननुगमादनुगतरूपेणहेतुत्वेदुर्घटंनचसंवेदिज्ञानस्यैवसंवेद्यांशस्योद्बोधकतयात
त्वेवसंवेद्यगोचरसंस्कारस्यानुद्बुद्धत्वमेवकुतइतिवाच्यंहस्तित्वादिनाहस्त्यादिज्ञानेपिकदाचिन्नियतहस्तिपदिसंवेद्यास्मर
णदर्शनात्संवेदिताबोधकरूपेणसंवेदिज्ञानस्यनियमतःसंवेद्यानुद्बोधकत्वात्तनचतत्तत्सदार्थेसंवेद्यविषयकसंवेदिज्ञान
त्वेनःतत्तत्सदार्थस्मृतावनुगतरूपेणहेतुताकल्पनमितिवाच्यंसंवेद्याविषयकस्यापिहस्त्यादिज्ञानस्यहस्तिपकादिस्मारक
त्वादन्यथाहस्तिपकादिसन्निकर्षोपसत्वेहस्तिपकादिसंवेदित्वेनहस्त्यादिज्ञानासंभवेनहस्तिदर्शनादितोहस्तिपकादि
स्मृतेरनुपपत्तेःतस्मात्संवेदिज्ञानस्याननुगतेनैवरूपेणहेतुतेति भेवं संवेद्याविषयकसंवेदिज्ञानस्यानियतोद्बोधकत्वादनि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यनेन तत्र शक्तिर्नास्ति हेतुत्वेपि तत्सदार्थसंवेदित्वेन संवेदिज्ञानसत्ये सत्यविरोधिसामग्र्या ज्ञानसामग्रीसत्येनियमेन तत्तत्सदार्थ
स्मरणोपगमात् तादृशरूपेणैव हेतुता कल्प्यते ज्ञापकाङ्गत्वतु तत्र शक्तिस्तेनानतकारणता प्रसंगात् न च तादृशसंवेदिज्ञानानंतर
तत्तत्सदार्थस्य मानसज्ञानम् संभवात् तदुपनायकज्ञानसत्ता शिति तत्र स्मरणमेव ज्ञापकाणि कं इति तादृशज्ञे संवेदिज्ञानस्य हेतुत्वे
तेनापि हेतुतिकाच्च स्मरामीत्यनुभवसाधानुरोधेन स्मरणस्य वशेषोपगतत्वात् तदन्यथा संस्कारस्योपनायकतापत्तिः न शा
चासर्वत्रैव स्मृतिस्थलेऽपनीतभानसंभवेन स्मृतिमात्रस्यैव विलक्षणपक्षे न च तादृशसंवेदिज्ञानस्य व्यभिचारेणगतत्वात्
यथा विषयकस्मृतित्वावच्छिन्नेन हेतुता न संभवति तज्जन्यतावच्छेदकतयो हेतुकातराधीनस्थितिव्याप्तजातिविशेषकल्प
नमपि न संभवति सकलपदार्थसंवेदिज्ञानजन्यतावच्छेदकतया सकलपदार्थस्मृतिनिष्ठैकजातिस्वीकारे एकसंवेदिज्ञानज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्येकपदार्थस्मरणेनत्रोद्बोधकोभावेनतत्पदार्थान्तरभानंनतत्रतत्पदार्थसंबंधिज्ञानस्यव्यभिचारात्रानाजातीनामेवकल्पनीयतया
तासांपरस्परंसंकरप्रसंगात्अतस्तत्रद्यक्तित्वमेवतज्जन्यतावच्छेदकंवाच्यंतथाचाननुगतरूपेणकारणताकल्पनमप्रयोजनिः
प्रयोजनंतत्रद्यक्तित्वेनकारणत्वेपिकारणताधिक्यविरहादितिवाच्यंत्वनंतकारणकल्पनापेक्षयाकार्यतावच्छेदकोद
वच्यवहितोत्तरत्वसंबंधेनकारणवैशिष्ट्यानिवेश्यानुगतरूपेणतादृशसंबंधिज्ञानानामेककारणताकल्पनात् एवंसंबंधि
तावच्छेदकीभूतयादृशधर्मप्रकारकज्ञानस्यतेःसत्यांविरोधिसामग्र्यांयस्यपुंसोनियमतोयादृशपदार्थस्मरणंतत्पुरुषीयता
दृशपदार्थस्मरणसंबंधाविषयकस्यापितादृशधर्मप्रकारकज्ञानस्यानुगतरूपेणैवहेतुताकल्प्यतेनतत्रद्यक्तिस्वरूपेणवा
वाहन्यंचोक्तपुत्रासंस्कारस्यविषयकत्वमहृतमेवस्वर्वभूतलेघटवत्रवेत्यादिसंशयात्मकज्ञानानभूतलत्वावच्छिन्नविशेष्यक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घटादिस्मरणादिवारणापत्ताहशस्मृतौ नाशसंस्कारस्येनहेतुत्वापत्त्यावश्यकत्वात्संस्कारविषयतासिद्धिः संशयाकारज्ञानानन्त
रमिस्मरणाद्यनुपपत्तेनसंस्कारस्यावश्यकतयानाहशसंस्कारस्येनाहेतुत्वे संशयात्ताहशस्मरणस्य दुर्वारत्वात्तनच ताहशस्मृतौ
निश्चयत्वेनैवसमानविषयकज्ञानस्यहेतुतास्तुतावतैवताहशाप्रतिबन्धकसंभवात्तभवन्मते पि संस्कारविशेषप्रतिबन्धेनरूपेण
हेतुतापत्त्यावश्यकत्वात्तत्रान्यथाताहशसंशयाद्भूतलत्वाद्यवच्छिन्नविशेष्यकघटादिप्रकारकसंस्कारोत्पत्तौबाधकाभावात्ता
हशस्मृतौताहशसंस्कारत्वेनहेतुत्वेयोगिप्रसंगताहस्यादिनिवाच्यतद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नाभावप्रकारकान्यतद्धर्मा
वच्छिन्नविशेष्यकतद्धर्मावच्छिन्नप्रकारकज्ञानत्वरूपनिश्चयत्वापेक्षयाल घुनातद्धर्मावच्छिन्नविशेष्यकतत्प्रकारकसंस्कारत्वेनहे
तुतायां स्त्रीसंशयात्ताहशसंस्कारवारणायतत्रताहशनिश्चयत्वेनहेतुताकल्पनप्रयुक्तगौरवस्यफलमुखत्वेनाकिंचित्करत्वात्तव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तुतस्तु अस्मन्मते संस्कारं प्रति तद्विशेष्यकतत्प्रकारकज्ञानत्वेनैव हेतुता न तु निश्चयत्वेन संशयात् संस्कारवारणाय तत्संशयस्य वि
शिष्यतत्तद्भावप्रकारकज्ञानत्वेन प्रतिबन्धकताकल्प्यते एवं च संस्कारस्य निर्विषयतापत्तेः तद्विशेष्यकतद्भावप्रकारकत्व
न हि शेष्यकतत्प्रकारकज्ञानत्वरूपस्य स्मृतिकारणतावच्छेदकधर्मकसंशयभेदे तत्प्रकारकत्वज्ञानत्वानोक्तदोषो विशेष्य
विशेषणाभावे विनिगमनाविरहेणाद्वैकारणताविषयभेदेन संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्मृतिं प्रति च संस्कारत्वेनैव हे
तुतास्वीकारे तत्तद्विशेष्यकतत्प्रकारकसंस्कारेतादृशज्ञानत्वेन हेतुत्वे तत्तत्प्रकारकत्वज्ञानत्वयोर्विशेष्यविशेषणाभावे विनि
गमनाविरहेणाकारणताप्रसङ्गे तद्भावप्रकारकज्ञानत्वेन संस्कारं प्रति प्रतिबन्धकत्वे तद्भावप्रकारत्वज्ञानत्वयोर्विशेष्यविशेष
णाभावे विनिगमनाविरहेण संशयस्य प्रतिबन्धकतादुर्वारा संस्कारस्य च स्मृतिं प्रति तत्प्रकारत्वसंस्कारत्वयोर्विशेष्यविशेषणाभा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वेविनिगमनाविरहेणकारणताद्वयमितिविषयभेदेनषट्कारणताः स्मृतिं प्रतिचसंस्कारसंबंधेनज्ञानत्वेनैकहेतुताइतिभवन्मते
विषयभेदेनानेतकारणतास्वःवच्छेदकगौरवंएककारणतायाश्चाधिकेनचसंशयस्यसंस्कारप्रतिबंधकत्वेसंशयानंतरोत्पन्ननि
श्चयात्संस्कारानुपपत्तिप्रसंगइतिवाच्यंसंशयनाशानंतरमेवतेनसंस्कारजननात्संस्कारंप्रतिज्ञानस्यकार्यसहभावेनहेतुतान
भ्युपगमात्अथवासंस्कारंप्रतितद्भावाप्रकारकज्ञानत्वेनैवहेतुतानतुसंशयस्यप्रतिबंधकत्वकल्प्यतेतत्प्रकारकज्ञानत्वे
नापिकारणतांतरंकल्पनीयंअतउपदर्शितधर्मत्रयस्यमिथोविशेष्यविशेषणभावेविनिगमनाविरहपुक्तकारणतावा
हुल्यस्यनावकाशःसंस्कारस्यनिर्विषयत्वमतेस्मृतिंप्रतिसंतद्भावाप्रकारकत्वविशिष्टतत्प्रकारकज्ञानत्वेनैवहेतुतावाच्यान
तुनिरुक्तधर्मद्वयावच्छेदेनएवकारणताद्वयेसंभवतितथासतिघटाभावाप्रकारकपटादिज्ञानजन्यसंस्कारस्यघटप्रकारकसंश

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यजन्यसंस्कारस्य च सत्वे घटस्य कारकस्मरणापत्तिः प्रत्येकं तादृशधर्मद्वयावच्छिन्नस्य घटाभावस्य सत्वात् अस्मन्मते च कपालस्य तादृशघटादिजा
न्यघटादिसंशयाभ्यां घटादिप्रकारकसंस्कारजननस्य न प्रसक्तिः कार्यसहभावेन ज्ञानस्य संस्कारजनकत्वात् कार्यकाले तादृशज्ञानद्वयस्या
सत्वात् एवं च संस्कारस्य निर्विषयकत्वं मते विषयभेदभिन्नानां कारणतातोऽसम्भवेऽपि एवं वदन्ते कारणतावच्छेदकगौरवमेव कारणता
धिक्यं चेति वस्तुतस्तु स्मृतिप्रतिनिम्बप्रतेन हेतुतामते भूतलविशेष्यकघटाभावप्रकारकत्वादिकं प्रत्येकं विशेषणस्य घटविशिष्टभू
तलघटवद्भूतलादिविशिष्टदेशादिरूपनानाविशिष्टपदार्थगोचरस्मृतिहेतुतायां निवेशनीयतयानन्तर्यं तादृशधर्मेण सहधर्मिण
गोविशेष्यविशेषणभावे विनिगमनाविरहाद्वन्ते कारणतायां कं अस्मन्मते च तथा विधसकलपदार्थगोचरसंस्कारसाधारणघटविशि
ष्टभूतलादिविषयकसंस्कारत्वापत्तिः न प्रतिभूतलविशेष्यकघटाभावप्रकारकान्यज्ञानत्वादिना एकैककारणतानवस्थानिर्वाहः भवतीति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घाविषयकत्वविशिष्टपदार्थस्मरणसाधारणघटविशिष्टभूतलविषयकस्मृतित्वावच्छिन्नं प्रति हेतुतावच्छेदकतादृशघटाभावप्रका
रकान्यत्वनिवेशे विभूतलमुख्यविशेष्यकघटनिश्चयजन्यसंस्कारस्य घटांशे संशयात्मकघटवद्भूतलविशिष्टदेशादिविषयकस्मा
नजन्यसंस्कारस्य च सत्त्वे घटवद्भूतलवान्देशश्चेत्याद्याकारकस्मरणापत्तेर्दुर्वारतया तादृशतादृशस्मृतौ तत्समानाकारकज्ञानीयप्रका
रणतीतरेष्टपितत्वविशेषणनमावश्यकमेवेति अस्मन्मते समानाकारकज्ञानस्य कार्यसहभावेन संस्कारहेतुतया क्रमीयत्वतादृशनि
श्चयतादृशसंशयाभ्यां घटवद्भूतलविशिष्टदेशादिविषयकसंस्कारजननासम्भवेन तदुत्तरं तादृशविशिष्टविषयकस्मरणापत्ते
र्निराकाशोपीति अयं संशयोत्तरमेकैककोटिस्मारकमात्रोद्बोधकसमवधाने इष्यतएवैकैककोटिनिश्चयः किंतु संशयात्मकस्म
रणमेव सिद्धांतविरुद्धतया नाभ्युपेयते लघ्वारणं च निश्चयत्वेन स्मृतिं प्रति संस्कारं प्रति वा ज्ञानस्य हेतुताकल्पनेनासाध्यं तत्कल्प

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेपि एकधर्मावच्छिन्नविशेष्यकप्रत्येककोटिनिश्चयद्वयजन्यसंस्कारयोर्युगपदुद्बोधकसमवधानेतादृशस्मरणापत्तेर्वज्रलेपायितत्वा
तच्चतः समानधर्मितावच्छेदकैककोटिस्मरणसामग्र्याश्चपरकोटिस्मृतिप्रतिबन्धकत्वस्वीकृत्यवसंशयाकारस्मृतिर्वारयित
व्याइस्मलंसमानविषयत्वेनस्मृतिप्रतिसंस्कारस्यहेतुतयासामान्यतःसंस्कारस्यसंस्कारत्वेनहेतुत्वेपिस्मृतिकारणतायांनिश्च
यत्वानिवेशनेनगौरवानवकाशात्इतिचेत्रसंशयादिकैककोटिस्मरणस्वीकारेउपेक्षात्मकसंशयात्तादृशस्मरणा
वारणापसंस्कारहेतुतायां तदुपेक्षाव्यक्तिभेदसहस्रनिवेशनेनमहागौरवापातात्तदपेक्षयाल्लाघवात्स्मृतिप्रति
विषयत्वेनहेतुतायाभवतामेवकल्पनीयत्वात्तदपेक्षयाउक्तलाघवेनचस्मृतिप्रतिसमानविषयकत्वेनसंस्कारस्यतंप्रति
निश्चयत्वेनज्ञानस्यहेतुतायांनिश्चयरूपत्वात्तनचोपेक्षात्मकसंशयाद्विप्रकलितानातद्विषयपदार्थानांस्मरणावारणा

१०

१०

१०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पतनुरुपेक्षाभेदानां संस्कारजनकत्वावच्छेदककोटौ निवेशनमावश्यकमेव तिवाच्यं उपेक्षानात्मकविषयकलितभावस्य दार्थो ज्ञा
नांतरं पत्रेपिक्षात्मकसंशयः तदनंतरं विषयकलितत्वत्पदार्थीसारणस्यावश्यकत्वात्तादृशसंशयत्वकीनां भेदनिवेशन
स्यानावश्यकत्वादेवं संस्कारस्य निर्विषयकत्वेमामसाहिकं प्रतिस्मृतिसामग्र्याउद्बोधकविशेषसमवहितघटादिवि
षयकज्ञानजन्यसंस्कारत्वेन प्रतिबंधकभावा घटविषयज्ञानजन्यत्वाद्यवेशेघटादिस्मारकउद्बोधकसमवहितपटादि
ज्ञानजन्यसंस्कारस्यापितस्मृतिबंधकतापत्तात्संस्कारस्यसविषयकत्वोपगमेवघटादिविषयकज्ञानजन्यस्यज्ञानेघटा
दिविषयकत्वमात्रेनिवेशपतइतिलाघवानुरोधेनापिसंस्कारस्यसविषयकत्वसिद्धिः एतत्कृतेपिसंस्कारस्यविषयतानि
यामककार्यकारणभावकल्पनागौरवंतुफलमुखतयानदोषायवस्तुतोनानाविधोद्बोधकमेतभावकल्पनानावि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

धूसामग्रीप्रतिबंधकत्वेऽवच्छेदकलाघवेनतद्विषयकज्ञानत्वेनैककारणताधिक्येनगौरवप्रयोजकमपिअप्रयोजनतद्विषयत्वेनाभि
मतेषुसंस्कारेषुविषयिताविशेषकार्य्यकारणीजातिविशेषएवस्वीक्रियतेकिंविषयतायांनचज्ञानादिषुरूपत्वविषयतयैवोपपत्तौ
अरूपत्वजातिविशेषोऽनुचितइतिवाच्यंघटादिविशेष्यकघटत्वादिप्रकारकस्मृतौघटादिविशेष्यकघटत्वादिप्रकारकस
स्कारत्वेनहेतुत्वेनहृदकसंस्कारवत्प्रकारत्वादीनांविशेष्यविशेषणभावेविनिगमनाविरहेणकारणताहृद्वेरवच्छेदकगौरवं
चजातिविशेषकारणतावच्छेदकतयाकल्पयितुमुचितत्वात्एवंजातिविशेषस्वीकारेसामग्रीप्रतिबंधकताणमपिनाघवसम्भव
तीतिनचघटपटादिविषयकस्मृतिजनकतावच्छेदकनानाजातीनांसमूहालंबनज्ञानजन्यसमूहालंबनसंस्कारेसामान्या
धिकरणात्प्रत्येकविषयकज्ञानजन्यसंस्कारेपरस्परपरिहारेणहेत्वोरजातिकल्पनसम्भवइतिवाच्यंसमूहालंबनस्थलेप्रत्येक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विषयकनानासंस्कारवारणमेवस्वीकारेगतासोजातीनामेकाधिकरणप्रसक्तिः उक्तलाघवेनजातिसिद्धौनच्छंकापरिहा
रप्रयुक्तिभेदकल्पनागौरवस्यफल ---- शेषवत्तनचघटत्वद्वत्वपित्रादिज्ञानाधीनविशिष्टस्मरणजनकसंस्कारेघट
वद्वत्वादिप्रत्येकपदार्थस्मरणजनकतावच्छेदकनानाजातीनांस्वीकारस्यावश्यकत्वेनन्यथाविशिष्टस्मरणस्यापिप्रत्येकवि
षयकतयानादृशसंस्काराद्विशिष्टस्मारकविलक्षणाद्विशिष्टस्मरणोत्पत्तेरेवासंभवात्तथाकल्पनि तोदूरीरस्तिवाच्यंतत्रविशि
ष्टस्मृत्युत्पादकसिद्धावतिरिक्तानांप्रत्येकस्मारकतावच्छेदकनानाजात्याक्रांतनानासंस्काराणांकल्पनयातादृशनानासंस्कार
सहकृतविशिष्टस्मारकविलक्षणसंस्काराद्विशिष्टस्मरणोपपत्तेरनसम्भवात्रैकसंस्कारेनानाजातीनामेवाकल्पनादितिचेत्कल्प
मुखगौरवस्यापिदोषतपायवस्थापनीयत्वात्संतसंस्कारवक्तीनामनंतजातीनांचकल्पनापेक्षयाउक्तविनिगमनाविरहे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

णाधिकक्रतिपयकारणानाकल्पनस्यावच्छेदकगौरवस्यचन्यायत्वात्फलमुखगौरवस्यदोषत्वाच्चाव्यवस्थापितत्वादिति इ
दृशव्यक्तिभेदादिकल्पनागौरवस्यजातिविशेषकल्पनायामविशेषितधर्मादिलिंगकपरामर्शादिजन्यतावच्छेदककोटावव्यवहि
तोत्तरत्वस्यान्यलिंगकानुमितौव्यभिचारवारणायनिवेशेगौरवात्जन्यतायामवच्छेदकतयाऽनुमित्यादौजातिविशेषाणांनाना
लिंगकपरामर्शादिसम्पन्नतस्थलेतेषांसंकरपरिहारानुरोधेनचुनानानुमित्यादिसंकीर्णापुरगपटुत्वादस्यचसिद्धिप्रसंगात्तनेह
सजातीयनानात्वानांपुरगपटुत्वादेसाधकाभावात्वस्यलिंगमपिबाधकेनिर्युक्तिसिद्धांतभंगस्यातद्यात्मातप्रत्यक्षाद्युत्पादका
लेऽनुमित्याद्युपगमेऽनुमितेर्मीत्याद्यनुव्यवसायापत्तिरतएकतेऽतिप्रसंगविरहात्तनचैवंपरस्परविजातीयनानावेष्टानांपुरग
पटुत्वादस्थलेचेष्टाविशेषजनकतावच्छेदकजातीनांसंकरभयेनचेतिरोगपद्यस्वीकारेविरुध्येतव्यक्तिभेदादिकल्पनागौरवम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

येनकार्य्यकारणभावेऽवच्छेदकतयागौरवादिसहिष्णुतायोगतत्तज्जातीयचेष्टोपलितत्तज्जातीयचेष्टानितिसाध्यतानिरूपितोपा
दानत्वावच्छेदकत्वसंबंधेनकृतिवेनहेतुतानुपगम्यसमूहालंबनैककृतितएवनानावयवेषुपुरुषप्रयत्नानियतनानाजातीयचेष्टोत्प
त्तिनिर्वाहाकृतिवैजात्यस्यैवासिद्धेरितिवाच्यंकृतियोगपश्चानभ्युपगमेकृतिविरहात्प्राचीनेयोग्या- विशेषपुरुषयोगपश्चस्येव
--पगम्यत्वलुतत्तुतद्विषयकस्मृतिंप्रतिविजातीयसंस्कारस्येनहेतुत्वेविषयताभेदेनस्मृतिसंस्कारयोऽनेनकार्य्यकारणभावप
संगाद्दौरवंसंस्कारस्यसविषयकत्वोपगमेचविषयमनिवेश्यप्रमानविषयताघ्रस्यासत्येवकार्य्यकारणभावोपगमाद्विषयभेदेन
तद्भेदइतिन्यायेनचस्मृतिंप्रतिसमानविषयत्वप्रत्यासत्यासंस्कारस्याहेतुत्वेद्रव्यत्वेनघटंपृथिवीत्वेनचपटंप्रवगाहमानेनजनिता
तसंस्कारोत्पृथिवीत्वेनचपटस्यस्मरणापत्तिरतस्तत्प्रकारतानिरूपितताद्विशेष्यताशालिस्मृतौतत्प्रकारतानिरूपितताद्विशेष्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१३

13

ताशालिसंस्कारत्वेन हेतुताकल्पनमावश्यकमिति विषयभेदेन हेतुताभेदस्यावश्यकत्वेति वाच्यं तद्दर्शप्रकारतानिरूपितविशेष्यतासंबंधेन स्व
तिप्रतिताद्दशसंबंधेनसंस्कारत्वेन हेतुत्वोपगमादुक्तातिप्रसंगनिरासस्य विशेष्यताभेदेन कारणताभेदस्य विरहाल्लाघवस्य च संभवात् अथ र
स्थितिविशेष्यनिष्ठप्रत्यासत्त्या प्रकारनिवेशप्रयुक्तविशेष्यतानिरूपितप्रकारतासंबंधेन स्वतिप्रतिताद्दशप्रत्यासत्त्या वा विशेष्यनिवे
शप्रयुक्तहेतुताकल्प्यतदस्य विनिगमनाविरहादुभयविधप्रत्यासत्त्यैव कार्यकारणभावस्य लघ्वपि विशेष्यप्रकारारेकत्वलिवेश्यासत्त्वि
ष्टप्रत्यासत्त्या कार्यकारणकल्पनापेक्षया एतन्मते कार्यकारणभावकल्पनामध्यतरत्वमेव तन्मते विशेष्यसंहस्रस्य प्रत्येकमेतार्थ्य प्र
कारसहस्रभेदेन सहस्रकारणतापत्त्या सहस्रगुणितसहस्रकार्यकारणभावापत्त्या तन्मते कैकं प्रकारविशेष्य -- भाव्य प्रकैक
कार्यकारणभावमात्रकल्पनापेक्षया सहस्रकार्यकारणभावमात्रकल्पनात्वेव संस्कारस्य स्वविषयकत्वोपगमे स्वनिरूपितविशेष्य

एम
१३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तासंबंधेन स्मृतिप्रतिबंधतादृशविषयत्वेन संस्कारत्वेन विषयविशेष्यमनंतर्भाव्य हेतुताकल्प्य तावतैकविषयकसंस्कारादन्यविषयकस्मरणस्य दृष्टमत्यपृथिवीत्याभ्यां घटपटविषयकसंस्काद्विपरीतप्रकारेण तदुभयस्मरणस्य च वारणात् तादृशविषयतासंस्कारनिरूपितातादृशविषयतायामेव निरूपितत्वसंबंधेस्टसुत्पादादेकविषयताशालिसंस्कारादन्यविधविधविषयताशालिस्मरणासंभवात् घटपटभूतलमित्यादिज्ञानजन्यसंस्कारे घटत्वादिप्रकारतानिरूपितघटादिमुख्यविशेष्यतापि स्वीक्रियते घटत्वादिप्रकारकघटविशेष्यकज्ञानघटितसामग्र्याप्रवृत्तिप्रामकत्वात् तत्सामग्र्यां घटवद्भूतलमित्यादिज्ञानकालेपि सत्वादतो घटवद्भूतलमित्यादिज्ञानजन्यसंस्कारात् भूतलादिभासकोद्बोधकासमवधानदशायां न तादृशमुख्यविशेष्यताशालिस्मरणानुपपत्तिः एवं च स्मृतिसामग्र्याः प्रतिबंधक घटादिज्ञानजन्यसंस्कारस्य घटादिविषयकसंस्कारत्वेन निवेशे शब्देन पदार्थज्ञानपुरस्कारेण निवेशे ज्ञाद्यवातनघ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१४

दिजातिविशेषाः सिध्यंतितदासिध्यंतु पदितद्दुपगमेसमूहालंबनस्थलेनानासंस्कारणांकल्पनीयतयागौरवेनबाधकंतत्रवना
स्माकंविद्वेषलक्षिद्धौश्चपक्षलाघवेनसंस्कारस्यसविषयकत्वसिद्धेर्निश्चयसहत्वाहकेचित्तुसंस्कारस्यसविषयकत्वानुपपत्तेघटादिज्ञा
नजन्यसंस्कारस्यघटादिस्मरणेनविनाशप्रसंगस्तन्मतेविषयमतेतभोग्यसंस्कारस्यस्मृतित्वाभ्यामेवसामान्यतोनाश्यनाशकभा
वस्याप्युपेयत्वात्तद्विषयकज्ञानजन्यसंस्कारत्वेनतद्विषयकस्मृतिनाश्यतोपगमेगौरवाल्लाघवोलतद्विषयकसंस्कारत्वस्ये
वनाश्यतावच्छेदकत्वसिद्धेः संस्कारस्यसविषयकतायानिष्प्रत्यूहत्वात्तनवजनकतासंबंधेनस्मृतित्वावच्छिन्नस्यप्रतियोगि
तासंबंधेनसंस्कारनाशंप्रतिहेतुत्वात्संस्कारकल्पीभूतस्मृत्यैवतत्संस्कारस्यनाशःसंभवतीतिनघटादिस्मृत्यास्वाजनकस्य
घटादिज्ञानजन्यसंस्कारस्यनाशापत्तिरितिवाच्यंसंस्कारस्यनिर्विषयकत्वमतेसामान्यतःस्मृतित्वावच्छिन्नप्रतिसंस्कारत्वेनैवज

एम
१४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नकत्वात् घटादिज्ञानजन्यसंस्कारस्यापि पटादिस्मृतिजनकतया उक्तापत्तेर्घारयितुमशक्यत्वात् तत्र शक्तिस्यावच्छिन्नजनकतानाश्र
यासन्निवेशेऽननुगमात् सामान्यजनकताव्याहतेतादृशजनकताकूटसाधारणस्य चाननुगतत्वात् सन्निवेशस्य दुर्निर्वचत्वा
त् चाननुगतो द्वोधकाधीनस्मरणेष्वुद्बोधकानां छेदतत्र शक्तिस्यावच्छिन्नोत्पादनियामकतया
तत्र संस्कारस्य तत्र शक्तिस्यैव हेतुतया नित्यानामणिकत्वात् एतेन स्वरूपसंबंधावच्छिन्नध्वंसप्रतिकजनकतात्वेन समवाय
प्रत्यासत्त्यवच्छिन्नजनकताऽऽपत्तेर्न तत्र शक्तिस्यावच्छिन्नजनकता - - स्य प्रत्यासत्तिस्वेपि न निस्तारः अथ संस्कारस्य स्वविषय
कत्वेपि तत्र शक्तिस्यैव तत्तत्संस्कारनाशकतावाच्छेदात् तद्विषयकसंस्कारनाशं प्रति सामानाधिकरण्यसंबंधेन तद्विषयकस्मृति
त्वेन सामान्यतः संस्कारनाशं प्रति जनकतासंबंधेन स्मृतित्वेन वा कारणत्वोपगमो घटपटादिगोचरसमूहालंबनजसंस्कारस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

केवलघटादिविषयकस्मरणेन नाशापत्यातदन्तरं पटादिस्मरणानुपपत्तेः एवं च संस्कारस्य निर्विषयकत्वेऽपि पटादिस्मरणे घटादिज्ञानज
न्यसंस्कारस्य न नाशायतिः न ह्येकस्य द्वयोः क्रिया नाशकतापाफलाभावेनानंगीकारात् न च समूहालंबनेप्येकपदार्थगोचरज्ञानासं
स्कारोऽयमेतादृशगोचरशीतसामान्यरूपेणापि नाशयन्नाशकभावः संभवति घटादिमात्रगोचरस्मरणेन तादृशसंस्कारविनाशेऽपि घ
टादिगोचरसंस्कारविनाशेऽपि पटादिगोचरसंस्कारावस्थानेन तदुत्तरं स्मरणमेव पर्यन्तैः घटवद्भूतलादिज्ञानाद्घटकेवलघटादिस्मर
णेन तत्रविशिष्टविषयकसंस्कारो न नश्यति घटत्वान्यधर्मावच्छिन्नप्रकारत्वानिरूपितघटादिपुरोवर्तिविशेष्यताशालिसंस्कारस्यैव घ
टत्वादिना घटादिविशेष्यकस्थितित्वावच्छिन्नाशयतोपगमादन्योन्यतत्रापितदुत्तरं भूतलादिस्मरणानुपपत्तिरिति वाच्यं समूहालंबनस्य
लेनाज्ञासंस्कारस्वीकारे घटादिस्मृतिनाशयतावच्छेदकतयाविषयिताकार्यकरणजातिविशेषानामेतावच्छेदकत्वस्य लाघवानु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रोमेनस्वीकर्तुमुचितत्वात् इति चैत्र संस्कारस्य सविशेषकत्वेतत्तद्व्यक्तित्वेनैव संस्कारस्मरणयोर्नाश्यनाश्यनाशकभावः अनेतत्कल्पनाग
तात् अपितु घटत्वादिप्रकारकघटादिविशेष्यकसंस्कारं प्रतितादृशस्मृतित्वेनैव नाशकतावसायसत्तिः कार्य्यस्य प्रतियोगिताकारणस्य सा
मानाधिकरणेस्वजन्यसंस्कारस्य स्मृत्याविनाशवारणाय अत्र पूर्वत्वमपि कारणतावच्छेदकसंबंधविशेषणं देयं एवं सुतसुखजन्यसंस्कार
स्य स्मृतीयहरणेननाशसंभवः नाशत्वावच्छिन्नं प्रतिस्वप्रतियोगिमत्वसंबंधेन हेतुतायाः क्लृप्तत्वात् संस्कारोत्पत्तिरूपेणतादृशसंबंधेनत
त्रनाशरूपकारणविरहत्वेपि संस्कारोत्पत्तिस्मृतीयहरणेतत्समवहितपूर्वहरणे स्मरणरूपकारणस्यैव विनाशात् अपेक्षाबुद्धेः क
रणत्वस्थापितमनेनस्मृतीयहरणपूर्वसंस्कारोत्पत्तानतादृशस्मरणजन्यसंस्कारस्य तादृशस्मरणचतुर्थहरणेनाशप्रसंगः दर्शितप्र
त्यासत्त्यानाशरूपकारणस्य स्मृतीयहरणेः सत्यातत्कालादिजन्यसंस्कारजन्यनाशेव्यभिचारवारणाय सामानाधिकरण्येस्वपूर्वत्वका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लिकविशेषणतेनत्रितयसंबंधेनसंस्कारेतादृशतादृशस्मृतिवैशिष्ट्यंतदीयकार्यतावच्छेदककोटौनिवेशनीयंस्वपूर्वत्वनिवेशात्तनिवेशा
त्कालादितत्रैस्मरणजन्यसंस्कारेनाशेनअभिचारः नाश्यतावच्छेदकतयाजातिविशेषकल्पनंसम्यक् कालस्तुतद्व्यक्तित्वेनैवनाशक
तातत्तद्व्यक्तित्वेनैवतन्नाश्यतोपगमात्तन्नाश्यतावच्छेदकतयाजातिविशेषसिध्यसंभवेपिविशीतज्ञाननाश्यतावच्छेदकतयापि--
तगजातिविशेषसिद्धेरावश्यकतयाउभयनाश्यसमूहालंबनसंस्कारेजातिसंकरापत्तेर्घटपटादिगोचरसमूहालंबनसंस्का
रस्यनचकेवलघटादिस्मरणेननाशापत्तिस्तन्नाशेघटादिस्मरणस्यापिहेतुतयातादृशकारणविरहेणसामग्रीविरहात्तन्नचपटा
दिस्मरणविनापिघटादिस्मरणजन्यतावच्छेदकावच्छिन्नस्यकेवलघटादिगोचरसंस्कारनाशस्यजनेनातत्समूहालंबनसंस्कारेघ
टादिस्मरणानुजन्यतावच्छेदकावच्छिन्नायत्किंचिद्वीरेतिवाच्यंघटत्वविशिष्टघटादिस्मरणविषयकसंस्कारनाशंप्रतितादृशतादृशसं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

संस्कारत्वेनापि प्रतियोगिनताहात्म्यप्रसाधनाहेतुत्वात्तन्महालेवनसंस्कारोनादृशकारणविरहेणक्रेवलघटादिगोचरसंस्कारनाश
निर्वाहकसामग्रीविरहात्तच्छ्रुतवान्यूनविषयकस्मरणस्यस्मृतित्वेनप्रतियोगितासंबंधेनसंस्कारनाशंप्रतिस्वाश्रयनिविषयतावत्व
संबंधेनस्वनिष्ठभेदप्रतियोगितावच्छेदकविषयतावत्वसंबंधेनप्रतिबंधकताकल्प्यतेयत्रत्रप्रत्येकघटपटगोचरसंस्कारसत्त्वेकमे
णतादृशस्मृतीजन्येतेतत्रघटस्मरणविनाशेसत्येवपटस्मरणेनपटसंस्कारोनाश्यतेपत्रतत्रतदुत्तरणेतत्रतदुत्तरभावीनस्मरण
भावकालीनपटस्मरणमेवकालविशेषएवापटसंस्कारनाशकः नत्वितरस्मरणकालीनपटस्मरणसंस्कारनाशंप्रतिप्रतिबंध
कसमवहितत्वात्तस्यथासामान्यतः संस्कारनाशस्यावच्छिन्नप्रतिस्मृतित्वेनैवहेतुताप्रतियोगिनिष्ठस्वाश्रयनिविषयताभूयस्त्व
कारणस्यप्रत्यासत्तिकतास्मरणविषयकस्मरणत्वसंस्कारनाशापत्तिः यद्वास्वाश्रयत्वसंबंधावच्छिन्नप्रतियोगिताकस्मरणाभाव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विशिष्टविषयतानेन संस्कारनाशं प्रति प्रतिबंधकतास्वीक्रियते प्रतिबंधकत्वविशेषणता विशेषः प्रतिबध्यस्य विशेषणता च प्रतिबो
गिन्वसंबंधः स्वाश्रयविषयतावत्संबंधेन स्मरणाभावपदवाच्यप्रतिबंधकः तत्संस्कारविषयतावद्विषयकस्मरणाभावदशायामेव तादृ
शप्रतिबंधकाभावः संस्कारे वर्त्तते तेन नतु तदीयपर्त्तिकिंचिद्विषयविषयकस्मरणदशायां तस्य तत्संस्कारविषयस्य पस्य नस्मरणस्मरणाभा
वविशिष्टायास्तदीयविषयतायास्तदीयविषयिताया घटितसंबंधेन स्मरणाभावस्य च संस्कारे सत्वात् पूर्वसंनिस्मरणस्य नाशकत्वमेव प्र
ख्यात मिति चेन्नाशकत्वरूपं तन्नैव नाशनिर्वाहकत्वरूपं तच्च प्रतिबंधताभावसंपादकतया ऽकृतमेव पूर्वेण घटपटादिगोचरस्मरणना
शाभिविशेषपदवाच्यतावच्छेदकविषयिताविशेषावच्छिन्नसंस्कारतापेक्षया लाघवात् तत्संस्कारे गौरवप्रतियोगिनोनन्नज्जातीय
संस्कारनाशहेतुतायां हि समानाधिकरणस्मरणस्य कारणतावच्छेदकत्वस्य शक्तिः जनकतायाः प्रत्यासत्तिवत्वपरा हि स्मारकसंस्कार

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यघटादिस्मरणजनकताविरहादेवतद्दलाज्ञनाशापत्यसंभवास्यतियोगिनोतेनरूपेणहेतुताकल्प्यतेकिंतुस्वतिरूपकारणव
लाज्ज्ञानकशरीरादावपिप्रतियोगितासंबंधेनसंस्कारनाशापतिवारणायूलाभान्यतःसंस्कारत्वावच्छिन्नंप्रति-त्वेनैकहेतुतेकक
ल्प्यतेसमूहालंबनस्थलेतुनानासंस्काराःपृथक्कल्प्यंतेतत्कल्पनागौरवस्यफलमुखत्वेनादोषतादिनिसंस्कारेनिर्विषयकत्वे
तिपरास्तेसंस्कारस्यनिर्विषयकत्वेघटपटादिस्मृतीनांविषयविशेषाविशेषणानेतनाशकताकल्पनेनमहागौरवात्सविषयक
त्वेचोक्तरीत्याएकप्रतिबंध्यप्रतिबंधकभावेनैवनिर्वाहात्तत्रचास्मृतविषयकएकपुरुषस्मरणदशायामन्यपुरुषीयसंस्कारनाश
वारणायतत्पुरुषीयसंस्कारनाशंप्रतितत्पुरुषीयस्मरणाभावस्यैवप्रतिबंधकताया[illegible]
तानस्याद्गौरवमितिवाच्यंपुरुषापेक्षयाविषयाणांबहुत्वतयालाघवस्यानपायादितिवदंति अत्रे------स्मरस्यसंस्का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१८

18

स्नाशकत्वमेवाप्रामाणिकं स्मरणानंतरमपि तज्जन्यसंस्कारेणास्मरणजननात् प्राचीनसंस्कारसत्त्वे हेतिविरहात् अथैवंतादृशसंस्कारस्य मु
क्तिर्भोगेनुभवप्रसंगः इति चेन्न तन्मतेपि चरमस्मरणजन्यस्य संस्कारस्य तत्प्रसंगो दुर्वारः यदि च तस्य कालत एव नाशकत्वं प्राचीनस्यापि स्मृतया
स्मृतेन कालस्यानुगतत्वेन नाशकत्वासंभवात् तत्संस्कारनाशे प्रतितस्य तत्र शक्तिर्वा नाशकतावच्छेदकत्वं वा गत्वा चरमस्मरणजन्यसंस्का
रनाशे प्रतितस्य हेतुत्वोपगमेपि प्राचीनसंस्कारस्य नाशे प्रतितस्य हेतुतानकल्प्यते हेतितानुगतनाशनाशकभावकल्पनेनैवोपपत्तेरिति वाच्यं स
म्मतेसंस्कारं प्रति स्वानुभवस्यैव कारणतायावकल्पनया स्मृत्यासंस्कारस्यैव जनकत्वात् चरमस्मृतिजन्यसंस्कारनाशनिर्वाहकारण
तास्वानीयकालकारणत्वेनैवानुभवजन्यसंस्कारनाशनिर्वाहेणकारणताधिक्यविरहात् स्वानुभवत्वजातौ सामांतविरहो न स्मृतिजन्या
नंतसंस्कारतत्रानिर्वाहकारणताकल्पनापेक्षया संस्कारसिद्धौ नसंस्कारकारणतावच्छेदकतया स्वानुभवत्वस्यैव जातिकल्पना

रम.
१८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यापत्वमाप्यमानस्यनुभवत्वस्यत्वसंदिग्धाव्यभिचारकत्वेपत्कारणतानवच्छेदकत्वेवीजेमभिहितंतदकिंचित्करलाघवसंभवेतादृशस्य
पस्यापिकारणतावच्छेदकत्वात्नचस्मृतिजन्यसंस्कारघटितघटितेगौरवंतादृशसंस्कारसंबंधीनविघ्नापकतयातादृशसंस्कारसि
द्धेः प्राग्भावविनिर्ज्ञानत्वेनकारणतायहेः विशेषीतितेनरूपेणकारणत्वेनिस्मृतस्यहमेवकारणतावच्छेदकतयाऽनुभवत्वसिद्धिः तादृ
शसंस्कारसिद्धेः पाप्तनसंभवतीतिकारणतायाःवच्छिन्नत्वग्राहकप्रमाणस्यज्ञानत्वावच्छिन्नत्वमादायेवचरितार्थत्वात्नतादृश
संस्कारसिद्ध्यधीनमनुपस्थितःतेनज्ञानत्वस्यावच्छेदकत्वेनिरासासंभवात्तादृशसंस्कारसिद्धौचव्यभिचारनिरासेनज्ञानत्वस्य
नष्टत्वेधर्मस्यकारणतावच्छेदकतयाऽनुभवसिद्धेरसंभवएवेतिवाच्यंस्मरणाव्यवहितोत्तरक्षणेसंस्कारोत्पत्तिरशक्योतादृशक्षणप
हीकृत्यकालवाहिस्थहेतुनासंस्कारोत्पत्तितदभावान्यतरत्वावच्छिन्नत्वसिद्धेर्निष्प्रत्यूहत्वात्तादृशधर्मस्यलाघवाज्ज्ञानित्वप

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सेवकारणतावच्छेदकतयासिद्धेः पूर्वगौरवानवतारेण ज्ञानत्वावच्छेदेन कारणतायहेपिउत्तरकालभवतीतुगौरवेण धर्मानुपस्थि
तिकालीनस्यतत्समनियतगुरुधर्मकारणताघटकत्वस्यैवतस्याप्रामाण्यंकल्प्यतेपरंचबाधनिश्चयादिभिर्बध्यतावच्छे
दकतयासिद्धेनपरोक्षज्ञानवृत्तिनास्मृतिसाधारणजातिविशेषेणसंस्कारत्वानुभवत्वजातिकल्पनंसंभवतितदास्तुस्मृतस्य
न्यज्ञानत्वमेवसंस्कारजनकतावच्छेदकंस्मृतिजन्यानामनंतसंस्काराणांकल्पनामपेक्ष्यतादृशगुरुधर्मस्यावच्छेदकतया
कल्पयितुमुचितत्वात्तादृशगौरवस्यज्ञानत्वावच्छिन्नकारणतायहपक्षेमशक्यनिश्चयतयाप्रथमंतेनरूपेणकारणतया
ग्रहेदर्शितदिशास्मरणानंतरस्मरणोत्पत्तिसिद्धौतदुपपादकतयास्मृतिसन्मात्रस्यधिकस्वग्रहीत कारणता
यामवच्छेदकत्वंकल्पनेधंसंप्रतिकेवलेनजन्यत्वेनहेतुताकल्पनेधंसानामनंतध्वंसकल्पनागौरवेणतादृशहेतुतायांभा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वत्वस्याप्यधिकस्यावच्छेदकतावत्संस्कारप्रतिस्थितित्वेनप्रतिबंधकत्वमेवकल्प्यतीपद्यंसंप्रतिप्रतियोगिमात्रस्यहेतुत्वे
हीनोद्वितीयक्षणेविनाशस्यघटाद्यंतरस्यचाकल्पनप्रयुक्तलाघवानुरोधेनइत्यादिनाशेःसमवायिकारणनाशादिहेतुतावत्स्व
न्यथाकरणभंगस्यदुर्वारतायातातरहशपुक्तेवटीकाकारानुयायिभिःक्रियासंयोगघटितपरस्परविजातीयसंयोगद्वयसामग्री
संयोजन--तादृशसंयोगद्वयंनोपयतेस्वपितुसामग्रीजन्योऽन्यजातीयपूर्वसंयोगलक्षणक्रियासंयोगयोरतिरिक्तकारणताद्व
यंप्रत्येकजन्यजातीयफलेपरस्परसामग्र्याःसत्प्रतिपक्षसंपलनस्यजपत्वप्रतिबंधकताद्वयंचकल्प्यतेस्वन्यथातत्संयोगय
क्तिकल्पनाधिक्यात्स्वयस्टतेःसंस्काराजनकत्वेस्टतीनांखजन्यसंस्कारविरोधिनीनामितिटीकाविरोधइतिचेत्काकृतिः
तद्रोधेननिर्युक्तिकपरूपावलंबनौचित्यात्स्वयंक्तिकल्पनागौरवभयेनातिरिक्तकार्यकारणभावोपगमेप्राथमिकघट

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घनुभवजन्यसंस्कारादेवद्वितीयादितदनुभवोत्पन्नसंस्कारस्य प्रतीतिर्द्वितीयादितदनुभवजन्यसंस्कारस्य कीनामनेतानाकल्पनमपेक्ष्य
लाघवेनसंस्कारंप्रतिसंस्कारस्यप्रतिबंधकत्वंकिंचकल्प्यतेइतिचेत्कल्प्यतएवएवंस्मृतिप्रतिबंधकत्वकल्पनमनर्थकमेवेतिचेदनर्थक
मेवएवंपरोक्षत्वज्ञानस्य न कारणतावच्छेदकतायाःअनुभवत्वजातिकल्पनमनर्थकमेवज्ञानत्वेनकारणत्वेपिचानुभवजन्यसंस्कार
रूपप्रतिबंधकवशेनस्मृत्यसंस्कारस्यजनयितव्यत्वात्अथसंस्कारंप्रतिसंस्कारत्वेनसामान्यतःसंस्कारत्वेनप्रतिबंधकत्वं
नसंभवतिघटज्ञानजन्यसंस्कारसत्वेपिपटज्ञानेनसंस्कारजननात्इतिघटादिविशेष्यकघटत्वादिप्रकारकज्ञानजन्यसंस्का
रंप्रतितादृशसंस्कारत्वेनप्रतिबंधकतावाच्यातदपेक्षयाचघटादिविशेष्यकघटत्वादिप्रकारकसंस्कारंप्रतितादृशसंस्कार
त्वेनएवप्रतिबंधकतायाःकल्प्यतेनुमुचितत्वात्संस्कारस्यसविषयकत्वेनिष्प्रत्यूहमेवेतिचेत्तदृशपुनःपासिध्यतुसंस्कारस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सविषयकत्वेनतत्रास्कारकविद्वेषः केचित्तु विपरीतज्ञाननाश्यतावच्छेदकतया संस्कारस्य स्वविषयकत्वसिद्धिः तथापि विपरीत
ज्ञानं संस्कारं नाशयति स्वतः आत्मतत्त्वज्ञानेनात्मनि शरीरादिभेदावगाहिनात्मशरीरभेदावगाहिमिथ्याज्ञानजन्यो वासनाख्यः
संस्कारो नाश्यते तस्य भूतत्वादिविशेष्यकघटाभावादिप्रकारकनिश्चयत्वेन भूतत्वादिविशेष्यकघटादिप्रकारकज्ञानजन्यसंस्कारना
श्यत्वावच्छिन्नप्रतिहेतुत्वे कार्यतावच्छेदकगौरवात् भूतत्वादिविशेष्यकघटादिप्रकारकसंस्कारनाशत्वावच्छिन्नं प्रतिएव हेतुतया क
ल्प्यते न च विपरीतज्ञानं विना समानाकारकस्मरणेन वेगादिना च संस्कारनाशाद्व्यभिचारः इति नानुगतधर्मस्य नाश्यतावच्छे
दकसंभवस्तत्र शक्तित्वस्य च तद्व्यापकत्वे च न तत्र विषयांतर्भावः प्रयोजनविरहादिति कथं तत्राश्यतावच्छेदकतया विषयतासि
द्धिरिति कालादिना श्यसंस्कारव्यावृत्तजातिविशेषस्यैव नाश्यतावच्छेदकतयोपगमात् कालादीनां मनुगतरूपेण नाश

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कत्वासंभवात्स्मरणस्यचसंस्कारनाशकत्वायानिरूपणत्वात्तन्नाशकत्वांतरनाश्यत्वावच्छेदकज्ञानेरसंभावितत्वयासंकरणत्वकाशात
अथयादृशविपरीतज्ञानेयादृशज्ञानविरोधितादृशज्ञानजन्यत्वंसंस्कारस्यादृशविपरीतज्ञानेननाश्यतेअतएवदोषविशेषजन्यमि
थ्याज्ञानेप्रत्यविरोधिना--यपत्तिकेनशास्त्रेणवासंसारिणमात्मतत्वाद्विज्ञानेनतज्जन्यायावासनायानविनाशः श्वचघटादि
प्रकारकचाक्षुषादिज्ञानजन्यसंस्कारनाशत्वावच्छिन्नप्रतियोगिताघटाभावादिप्रकारकलौकिकचाक्षुषादिनिश्चयत्वेनलौकिकसंनिकर्षा
दिजन्यघटादिप्रकारकज्ञानजन्यसंस्कारनाशत्वावच्छिन्नप्रतिसामान्यतोघटाभावादिनिश्चयत्वेनकारणताकल्पनीयाइति
तन्नद्विषयकज्ञानजन्यत्वनिवेशस्यावश्यकतयाकृतसंस्कारस्यसविषयत्वेनेतिचेन्नपूर्वमप्यनिद्रिपपदार्थप्रकारकज्ञानेप्रति
विपरीतनिश्चयमात्रस्यैवप्रतिबंधकतयातादृशज्ञानजन्यसंस्कारस्यविपरीतनिश्चयनाश्यतायांज्ञानविशेषजन्यत्वनिवेशस्या

२१

२१

राम.
२१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नावश्यकतयाताद्दशनाशपताव्छेदकतयैवसंस्कारविषयतासिद्धेः अथनानाधर्मविकारकसमूहालंबनजन्यसंस्कारस्य
यत्किंचिदेकधर्मावच्छिन्नभावनिश्चयेनविनाशवारणायुक्तत्वेनशक्तिलेनाशप्रतिबंधकभावोवाच्यः तथाचसंस्कारविषयतातत्तद्व्यक्तिना
शत्वस्यविपरीतज्ञानजन्यतावच्छेदकत्वेपिसामानाधिकरण्यरूपकारणतावच्छेदकप्रत्यासत्त्याविपरीतज्ञानस्यसंस्कारांतरेपिस
त्वेनतत्संस्कारनाशप्रतिसंस्कारत्वेनतादात्म्यप्रत्यासत्त्याहेतुताचावश्यकत्वेविपरीतज्ञानस्यानुगतधर्मावच्छिन्नप्रत्यपि
कारणसमूहालंबनात्मकसंस्कारव्यक्तीनामेवविपरीतज्ञानेनफलजननेसहकारितामुपगम्यतिप्रसंगवारणसंभवाद्विशिष्टवाच्य
यादृशसमूहालंबनसंस्कारः समूहालंबनेनविपरीतज्ञानेननाशयिष्यतेतादृशसंस्कारव्यक्तेर्विपरीतज्ञानसहकारिताचावश्यक
त्वात्पूर्वोक्तत्वेनयत्किंचिदेकधर्मावच्छिन्नभावनिश्चयेनतत्रावाशस्यदुर्वारतयाविपरीतज्ञानस्यतत्तद्व्यक्तिनाशप्रतितत्तद्व्यक्तिलेन

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हेतुताघ्राश्रावश्यकत्वादिति चेन्न उक्तातिप्रसंगवारणाय समूहालंबनसंस्कारव्यक्तीनां विनाशं प्रति विपरीतज्ञाने व्यक्तीनां तत्र
क्लिष्टत्वेन हेतुत्वमुपगम्यते समूहालंबनात्मकसंस्कारेषु तत्तद्धर्मप्रकारकविजातीयसंस्कारनाशप्रत्यनुगतरूपेणैव तत्तद्धर्मीभावप्रकार
कज्ञानानाकारणत्वमुपगम्यते विजातीयसंस्कारनाशं प्रति विजातीयसंस्कारत्वेन प्रतिबंधो गिनात्मकहेतुताकल्प्यते विपरीतज्ञानना
श्यतावच्छेदिकासाजातिः समूहालंबनसंस्कारत्वादेतेभिन्नानुगतकारणतावच्छेदकावच्छिन्नत्वात् पत्किंचिदेकधर्मभावनिश्चय
त्वेन दशापि समूहालंबनसंस्कारत्वाशापत्तिः वस्तुतस्तु समूहालंबनजन्यसंस्कारस्य पत्किंचिद्विपरीतज्ञानेन विनाशेन तत्तद्विष
यतास्वेव तत्सापि विषयस्यापि स्मरणापत्तिः एतः तन्नाशो न्वरसभंगीकार्यः तथा च तत्तद्विषयांतरस्मरणनिर्वाहार्थं पश्चात्
त्वेन नानासंस्कारापूर्वकल्पनीयाः तथा च न चापि तत्र युक्तिः त्वेन विपरीतज्ञानस्य नाशकतास्वीकारे विनाश्यतावच्छेदकलाघवाप

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विषयभेदेन विभिन्नापरजातिविशेषाणां तद्विपरीतज्ञानानाश्रयतावच्छेदकतया स्वीक्रियेत किं विषयतयेति चेन्न यथा दशया दशसमूहा
त्मकत्वेनोत्पन्नतावत्यर्थाविषयकसमूहालम्बनात्मकमेव विपरीतज्ञानं इति नियतपरतावदेतेन गतार्थत्वं किंचिदेकाभावज्ञानं ततो
नानासंस्कारमुपगमेहनिविरहेण लाघवादेकसंस्कारस्यैव कल्पनात्तादृशसंस्कारेणानाविपरीतज्ञानानाश्रयतावच्छेदकजा
तीनां संकरप्रसंगेन नानाजातिकल्पनासंभवात् नाश्रयतावच्छेदकत्वावानुरोधेनोपदर्शितस्थले नानासंस्काराकल्पना
यामनुचितत्वात् वस्तुतस्तु संस्कारस्य निर्विषयकत्वे विषयभेदेन विपरीतज्ञानभेदस्यावश्यकतया अस्मन्मतकारणताकल्पन
ऽसंगः संस्कारस्य सविषयकत्वे च प्रतियोगितासंबंधेन संस्कारनाशं प्रति स्वीयाभावविषयतानिरूपितप्रतियोगितासंबंधावच्छि
न्नप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितस्वविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकत्वस्य सामानाधिकरण्येनाभावसंबंधेनाभावनिश्च

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पत्वेन विषयविशेषाननिवेशेनैककार्यकारणभावकल्पनयैवोपपत्तिः तद्धर्मावच्छिन्नविशेष्यताकैकधर्मावच्छिन्नप्रकारकसंस्कार
२३ एवतद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नाभावनिश्चयस्योक्तसंबंधेन सत्त्वादितिप्रसंगविरहात् नचैवं वा पुरुषत्वाभाववान् घ
टस्य वा पुत्राभाववानित्यादिनिश्चयाद्घटौ पुरुषत्ववानित्यादिज्ञानजन्यसंस्कारनाश्यापत्तिः तादृशसंस्कारस्य वा पुत्रावच्छि
न्नविशेष्यतानिरूपितताद्दशनिश्चयाभावविषयतानिरूपितं प्रतियोगिप्रकारतावच्छेदकपुरुषत्वाद्यवच्छिन्नपुरुषत्वावच्छे
दनिरूपितप्रतियोगिप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वापि प्रकारतानिरूपितताद्दशनिश्चयीयत्वापुत्राद्यभाव
निरूपितविशेष्यतावच्छेदकघटत्वाद्यवच्छिन्नविशेष्यताकत्वादितिवाच्यं स्वी- - - - - - - - - - - -
निवेशनीयत्वात् विशेष्यताक्रमभावविषयतावैशिष्ट्यस्य तावच्छेदकावच्छिन्नत्वस्य निरूपिताभावप्रकारतानिरूपितप्रतियोगिप्रकार

२३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वोभयसंबंधेन निवेशनीयतया दर्शितसंस्कारीयघटत्वाद्यवच्छिन्नविशेष्यतायां दर्शितनि
श्चयीयतादृशविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगिप्रकारतासंबंधेन तावच्छेदकवाऽत्वाद्यवच्छिन्नप्रकारतानिरूपितत्वविं
शिष्टेणातिप्रसंगाभावात्तत्तद्विषयविशेषमवंतर्भाव्यनिश्चयत्वस्य दुर्वचत्वात्तथा च प्रकारः साक्षीयानिति वाच्यं विषयविशेषमन
तर्भाव्य तत्रिर्वचनप्रकारापि दर्शनीयत्वात्तत्तच्चेवंभूतदशसामग्रीबलात्स्मृतत्वं घटत्वादित्यादिचाक्षुषादिज्ञानजन्यसंस्कारस्यानु
मानिकादिभ्रमत्वाद्यवच्छिन्नधर्मिकघटाद्यभावादिज्ञानाज्ज्ञानाशापत्तिर्दुर्वारैव तिवाच्यं स्मृतादिषु गौरवसंस्कारनाशकस्यैक
त्वजन्यतावच्छेदकत्वोपगमात्तदवच्छिन्नप्रतियुक्तादृशसंस्कारत्वेनापि प्रतियोगिनो हेतुत्वकल्पनया उपस्थाभावात्घटादिज्ञानज
न्यसंस्कारस्य पूर्वदर्शितरीत्या विषयमवंतर्भावे चैकैककारणत्वोपगमात्तत्प्रयुक्तत्वेभावनिश्चयसामान्यनाशापत्तावच्छेदकको

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२४

टोलौकिकज्ञानाजन्यत्वमेवनिवेशनीयंश्रुतौनोक्तायत्सवकाशः लौकिकज्ञानाजन्यत्वेचस्मृत्यन्यत्वीयालौकिकप्रकारताकत्वोभयसं
वेधेनज्ञानवदन्यत्वंश्रुतौघटांशेलौकिकपटोपनीतभानजन्यसंस्कारस्यानुमानिकादिपटाभावनिश्चयेननाशोपपत्तिः तत्रसंस्का
रद्वयस्यैवोपगमेनपटप्रकारकसंस्कारस्यघटाप्रकारतयासजनकज्ञानीयालौकिकप्रकारतासमानाधिकरणप्रकारता
कत्वविरहात्तत्रहेतौलौकिकज्ञानजन्यतप्रकारकसंस्कारस्याहेतुत्वप्रवाजातिविशेषाः विपरीतनिश्चयसामान्यनाशप्रतावच्छेद
कतयोपगम्यतेः नोनोक्तापत्तिः प्रसक्तिः एवंचाहुर्यादिज्ञानजन्यसंस्कारनाशंप्रतितादृशविपरीतज्ञानस्यविषयविशेषानंतर्भावेने
वकारणतावाच्यारतिवदंति अथसंस्कारस्यसविषयकत्वोपगमेःनुहुद्रविशेषणाहिशेषवत्संस्कारद्विशिष्टवैशिष्ट्यबोधादिवारण
यविशेषणाज्ञानादिकारणतायांविशेषणाद्विषयकज्ञानत्वेनैवहेतुतावाच्यातथाचावच्छेदकोटौज्ञानत्वस्याधिकस्यनिवेशनीयत

राम-
२४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५ यागोरवं संस्कारस्यनिर्विषयकत्वे विशेषणज्ञानादीनां विशेषणविषयकत्वे वैवहेतुसंभवाद्दिति चेन्न विषयभेदेन कारणतानेत्यभिया
विषयनिष्ठप्रत्यासत्त्यैव विशेषणज्ञानादीनां हेतुत्वोपगमात् कारणतावच्छेदककोटौ विशेषणादिविषयकत्वानिवेशाद्वतापि
ज्ञानत्वस्वकारणतावच्छेदकतायाः स्वीकारणीयतया लाघवविरहात् नवसंस्कारस्यनिर्विषयकत्वे ज्ञाने छाद्रूतिसाधारणगुणत्वेनैव
विशिष्टबुध्यादिहेतुतास्वीक्रियतेन तु ज्ञानत्वेन एवं च छद्रूतिसाक्षात्कारस्य स्वमनंतविषयस्मरणकल्पनेनैतस्माद्वाद्यवातभवन्म
तेनकल्पनाया आवश्यकत्वादिति वाच्यं संस्कारस्य सविषयकत्वे [illegible] योग्यत्वे विशेषगुणनिष्ठजातिविशेषस्यैव का
रणतावच्छेदकत्वोपगमात् छद्रूतिसाक्षात्कारे विषयस्मरणकल्पनादिति संक्षेपः इति स्मृतिसंस्काररहस्यं रामचंद्रकृतं
श्रीरामपनमः ७ ७ श्रीलक्ष्मणनमः संवत १७८६ वैशाखशुक्लपक्षे २ राम
२५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative